## संस्कृतवार्ता:

**दिनाङ्क :-09.10.2025**

**प्रात: - 06:55**

**<u>मोदी-यूके प्रधानमन्त्री वार्तालापः</u>**

**प्रधानमन्त्री नरेन्द्रमोदी,अद्य मुम्बई-नगरे तस्य यू. के.-देशस्य समकक्षीयेन कीर् स्टार्मर इत्यनेन सह वार्तालापं करिष्यति। ब्रिटेन्-देशस्य प्रधानमन्त्री ह्यः द्विदिवसीय-भारतयात्रायाम् मुम्बई -नगरं संप्राप्तवान्। श्री स्टार्मर् इत्यनेन सह यू. के.-देशात् बहुसंख्यायां व्यापारप्रतिनिधयः समागताः सन्ति। वार्तालापावधौ उभौ ' पञ्चत्रिंशोत्तर द्विसहस्रतम वर्षस्य लक्षस्य अनुरूपं भारत-यू. के. समग्र-सामरिक-सहभागित्वस्य विविध-पक्षाणां प्रगतिं अवलोकयिष्यतः। पञ्चत्रिंशोत्तर द्विसहस्रतम वर्षस्य लक्षे व्यापार-निवेशः, प्रौद्योगिकी-नवान्वेषणम्, रक्षा-सुरक्षा, जलवायु-ऊर्जा, स्वास्थ्यं, शिक्षा, जनसम्पर्कः इत्यादिषु प्रमुखस्तम्भेषु केन्द्रीकृतः कालबद्धः च दशवर्षीयः कार्यक्रमाः उपक्रमाः सन्ति। भविष्ये भारत-यू. के. आर्थिकसहभागित्वस्य केन्द्रित-स्तम्भ-रूपेण भारत-यू. के. समग्र-आर्थिक-व्यापार-सन्धिद्वारा प्रस्तुतानां अवसराणां विषये व्यापार-उद्योगनेतृभिः सह उभौ नेतारौ वार्तालापं करिष्यतः। क्षेत्रिय -वैश्विकयोः च महत्त्वपूर्णेषु विषयेषु अपि तौ विचारान् विनिमयं करिष्यतः। द्वयोः नेत्रोः उद्योगविशेषज्ञैः, नीतिनिर्मातृभिः, आविष्कर्तृभिः च सह अपि संवादः भविष्यति। उभौ अद्य मुम्बई -नगरे षष्ठ्यां ग्लोबल्-फिन्टॅक्-फ़ेस्ट् इत्यस्मिन् कार्यक्रमे मुख्यभाषणं करिष्यत:। मुम्बई-नगरे स्वस्य भ्रमणस्य प्रथमदिने ह्य: वाणिज्यनेतृन् सम्बोधयन् युनैटेड् किङ्ग्डम्-देशस्य प्रधानमन्त्री सर् कीर स्टार्मर्-वर्यः अवदत् यत् भारत-यू. के. मुक्तव्यापार-सन्धिः इति यूरोपियन्-यूनियन इत्यतः निष्कासनात् परं युनैटेड् किङ्ग्डम्-देशेन हस्ताक्षरितः बृहत्तमः व्यवहारः अस्तीति। सः इत्यपि अकथयत् यत् एतत् युनैटेड् किङ्ग्डम् इत्यनेन भारतं प्रति प्रेषितं बृहत्तमं वाणिज्याभियानम् अस्ति।**

-

## राष्ट्रपति-भ्रमणम्

राष्ट्रपतिः द्रौपदीमुर्मुः अद्यारभ्य गुजरातराज्यस्य त्रिदिवसीय यात्रायां भविष्यति। सा श्वः सोमनाथ-मन्दिरे आरती दर्शनं च करिष्यति। सा गिर्-राष्ट्रिय-उद्याने गमिष्यति, सासन्-गिर् इत्यत्र स्थानीयजनजातीयसमुदायस्य सदस्यैः सह संवादम् अपि करिष्यति। शनिवासरे राष्ट्रपतिः मुर्मुः द्वारिका-नगरस्य द्वारिकाधीश-मन्दिरे आरती दर्शनं च करिष्यति। सा अहमदाबाद्-नगरे गुजरातविद्यापीठस्य एकसप्ततितमे दीक्षान्तसमारोहेऽपि भागं ग्रहीष्यति।

## बिहार्-मतदान-संरचना

आगामि बिहार्-विधानसभा-निर्वाचने सरलं सुलभं च मतदानं सुकरं कर्तुं निर्वाचनायोगेन भू-स्तरीय-मतदानकेन्द्रेषु परिष्काराय व्यापकानि निर्देशानि प्रदत्तानि। आयोगस्य निर्देशानुसारं, प्रत्येकस्मिन् मतदानकेन्द्रे दिव्यांगजनानां वरिष्ठनागरिकाणां च कृते रैम्प्स् इत्यस्य, सुलभसंरचनायाः, सुरक्षितमार्गस्य, सङ्केतानां, पेयजलस्य, शौचालयानां, समुचितस्य प्रकाशस्य उपलब्धतायाः, प्रतीक्षालयस्य च व्यवस्था भवेत्। मतदान केन्द्रेषु अधिक जनसम्मर्दं न्यूनीकर्तुं पृथक् पृथक् गमनागमन द्वाराणि च भवेयुः।

## कान्पुर्-विस्फोटः

उत्तरप्रदेशे, ह्यः सायङ्काले कानपुर्-नगरे एकस्य आपणस्य समीपे द्वयोः स्कूटीति यानयोः विस्फोटेन षट् जनाः व्रणिता। कानपुर्-नगरस्य आरक्षक-आयुक्तः रघुवीर् लालः अवदत् यत् मूल्-गञ्ज्-कोतवाली-नगरस्य मिस्री-बजारेति-क्षेत्रे एकस्य आपणस्य अग्रे द्वयोः स्कूटीति-यानयोः विस्फोटः अभवत् इति। आहतेषु षड् जनेषु द्वौ जनौ गम्भीरावस्थायां स्तः, तौ अन्यत्र चिकित्सालये प्रेषितौ। शेषाः व्रणिताः कानपुर्-नगरस्य उर्सला-चिकित्सालये प्रवेशिताः सन्ति।